# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री गीत गोविंद॥



### ॥ द्वादशः(स्) सर्गः ॥(सुप्रीतपीताम्बरः)

(हरिणी)

गतवति सखीवृन्देऽमन्दत्रपाभरनिर्भर-
स्मरपरवशाकूतस्फीतस्मितस्नपिताधराम् ।
सरसमनसं(न्) दृष्ट्वा राधां(म्) मुहुर्नवपल्लव-
प्रसवशयने निक्षिप्ताक्षीमुवाच हरिः(फ्) प्रियाम् ॥ 1॥

### ॥ गीतम् 23॥

(अथ त्रयोविं(म्)शतितमः(फ्) प्रबन्धो विभासरागेण एकतालीताले गीयते)

किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशम् ।
तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशम् ॥
क्षणमधुना नारायणमनुगतमनुसर राधिके ॥ 1॥

करकमलेन करोमि चरणमहमागमितासि विदूरम् ।
क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरम् ॥ 2॥ क्षणमधुना

वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलम् ।
विरहमिवापनयामि पयोधररोधकमुरसि दुकूलम् ॥ 3॥ क्षणमधुना

प्रियपरिरम्भणरभसवलितमिव पुलकितमतिदुरवापम् ।
मदुरसि कुचकलशं(वँ) विनिवेशय शोषय मनसिजतापम् ॥ 4॥
क्षणमधुना

अधरसुधारसमुपनय भामिनि जीवय मृतमिव दासम् ।
त्वयि विनिहितमनसं(वँ) विरहानलदग्धवपुषमविलासम् ॥ 5॥
क्षणमधुना

शशिमुखि मुखरय मणिरशनागुणमनुगुणकण्ठनिनादम् ।
श्रुतियुगले पिकरवतविकले मम शमय चिरादवसादम् ॥ 6॥क्षणमधुना

मामतिविफलरुषा विकलीकृतमवलोकितमधुनेदम् ।
लज्जितमिव नयनं(न्) तव विरमति सृजसि वृथारतिखेदम्॥7॥क्षणमधुना

श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदम् ।
जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदम् ॥ 8॥क्षणमधुना

(शार्दूलविक्रीडितेन)

प्रत्यूहः(फ्)पुलकाङ्कुरेण निबिडाश्लेषे निमेषेण च
क्रीडाकूलविलोकितेऽधरसुधापाने कथाकेलिभिः ।
आनन्दाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभू-
दुद्भूतः(स्) स तयोर्बभूव सुरतारम्भः(फ्) प्रियं(म्) भावुकः ॥ 1॥

(शार्दूलविक्रीडितेन)

दोर्भ्यां(म्) सं(यँ)यमितः(फ्) पयोधरभरेणापीडितः(फ्) पाणिजै-
राविद्धो दशनैः(ह) क्षताधरपुटः(श्) श्रोणीतटेनाहतः ।
हस्तेनानमितः(ख्) कचेऽधरसुधापानेन सम्मोहितः(ख्)
कान्तः(ख्) कामपि तृप्तिमाप तदहो कामस्य वामा गतिः ॥ 2॥

(शार्दूलविक्रीडितेन)

माराङ्के रतिकेलिसं(ङ्)कुलरणारम्भे तया साहस-
प्रायं(ङ्) कान्तजयाय किञ्चिदुपरि प्रारम्भि यत्सम्भ्रमात् ।
निष्पन्दा जघनस्थली शिथिलिता दोर्वल्लिरुत्कम्पितं(वँ)
वक्षो मीलितमक्षि पौरुषरसः(स्) स्त्रीणां कुतः(स्) सिद्ध्यति ॥ 3॥

(शार्दूलविक्रीडितेन)

तस्याः(फ्) पाटलपाणिजाङ्कितमुरो निद्राकषाये दृशौ
निर्धूताऽधरशोणिमा विलुलितस्रस्तस्रजो मूर्द्धजाः ।
काञ्चीदामदरश्लथाञ्चलमिति प्रातर्निखातैर्दृशो-
रेभिः(ख्) कामशरैस्तदद्भुतमहोपत्युर्मनः(ख्) कीलितम् ॥ 4॥

(शार्दूलविक्रीडितेन)

त्वामप्राप्य मयि स्वयं(वँ)वरपरां(ङ्) क्षीरोदतीरोदरे
शङ्के सुन्दरि कालकूटमपिबन्मूढो मृडानीपतिः ।
इत्थं(म्) पूर्वकथाभिरन्यमनसा विक्षिप्य वामाञ्चलं(म्)
राधायाः(स्) स्तनकोरकोपरिचलन्नेत्रे हरिः(फ्) पातु वः ॥ 5॥

(स्रगधरा)

व्यालोलः(ख्) केशपाशस्तरलितमलकैः(स्) स्वेदलोलौ कपोलौ

स्पष्टा बिम्बाधरश्रीः(ख्) कुचकलशरुचा हारिता हारयष्टिः ।
काञ्चीकाञ्च्युद्गताशां(म्) स्तनजघनपदं(म्) पाणिनाऽऽच्छाद्य सद्यः(फ्)
पश्यन्ती चात्मरूपं(न्) तदपि विलुलितं(म्) स्रग्धरेयं(न्) धुनोति ॥ 6॥

(शार्दूलविक्रीडितेन)

ईषन्मीलितदृष्टिमुग्धहसितं(म्) सीत्कारधारावशा-
दव्यक्ताकुलकेलिकाकुविकसद्दन्तां(म्)शुधौताधरम् ।
श्वासोत्कम्पिपयोधरोपरि परिष्वङ्गात्कुरङ्गीदृशो
हर्षोत्कर्षविमुक्तनिः(स्)स्सहतनोर्धन्यो धयत्याननम् ॥ 7 ॥

(अनुष्टुप)

अथ सा निर्गताबाधा राधा स्वाधीनभर्तृका ।
निजगाद रतिक्लान्तां(ङ्) कान्तां(म्) मण्डनवाञ्छया ॥ 8 ॥

इति सहसा सुप्रीतं(म्) सुरतान्ते सा नितान्तखिन्नाङ्गी ।
राधा जगाद सादरमिदमानन्देन गोविन्दम् ॥ 9॥

॥ गीतम् 24 ॥

(अथ चतुर्विं(म्)शतितमः(फ्) प्रबन्धो रामकरीरागेण रूपकताले गीयते)

कुरु यदुनन्दन चन्दनशिशिरतरेण करेण पयोधरे ।
मृगमदपत्रकमत्र मनोभवमङ्गलकलशसहोदरे ।
निजगाद सा यदुनन्दने क्रीडति हृदयानन्दने ॥ 1॥

अलिकुलगञ्जनमञ्जनकं(म्) रतिनायकसायकमोचने ।
त्वदधरचुम्बनलम्बितकज्जलमुज्ज्वलय प्रिय लोचने ॥ 2॥ निजगाद

नयनकुरङ्गतरङ्गविलासनिरोधकरे श्रुतिमण्डले ।
मनसिजपाशविलासधरे शुभवेश निवेशय कुण्डले ॥ 3॥ निजगाद

भ्रमरचयं(म्) रचयन्तमुपरि रुचिरं(म्) सुचिरं(म्) मम सम्मुखे ।
जितकमले विमले परिकर्मय नर्मजनकमलकं(म्) मुखे ॥ 4॥ निजगाद

मृगमदरसवलितं(लँ) ललितं(ङ्) कुरु तिलकमलिकरजनीकरे ।
विहितकलङ्ककलं(ङ्) कमलानन विश्रमितश्रमशीकरे ॥ 5॥ निजगाद

मम रुचिरे चिकुरे कुरु मानद मनसिजध्वजचामरे ।
रतिगलिते ललिते कुसुमानि शिखण्डिशिखण्डकडामरे ॥ 6॥ निजगाद

सरसघने जघने मम शम्बरदारणवारणकन्दरे ।
मणिरशनावसनाभरणानि शुभाशय वासय सुन्दरे ॥ 7॥ निजगाद

श्रीजयदेववचसि शुभदे सदयं(म्) हृदयं(ङ्) कुरु मण्डने ।
हरिचरणस्मरणामृतनिर्मितकलिकलुषज्वरखण्डने ॥ 8॥ निजगाद

(हरिणी)

रचय कुचयः(फ्) पत्रं(ञ्) चित्रं(ङ्) कुरुष्व कपोलयो-
घटय जघने काञ्चीं मुग्धस्रजा कबरीभरम् ।
कलय वलयश्रेणीं(म्) पाणौ पदे मणिनूपुरा-

विति निगदितः(फ्) प्रीतः(फ्) पीताम्बरोऽपि तथाकरोत् ॥ 1॥

(शार्दूलविक्रीडितेन)

पर्यङ्कीकृतनागनायकफणाश्रेणीमणीनां(ङ्) गणे
सङ्क्रान्तप्रतिबिम्बसङ्कलनया बिभ्रद्वपुर्विक्रियाम् ।
पादाम्भोरुहधारिवारिधिसुतामक्ष्णां(न्) दिदृक्षुः(श्) शतैः(ख्)
कायव्यूहविचारयन्नुपचिता कूतो हरिः(फ्) पातु वः ॥ 2॥

(शार्दूलविक्रीडितेन)

यद्गान्धर्वकलासु कौशलमनुध्यानं(ञ्) च यद्वैष्णवं(यँ)
यच्छृङ्गारविवेकतत्त्वरचनाकाव्येषु लीलायितम् ।
तत्सर्वं(ञ्) जयदेवपण्डितकवेः(ख्) कृष्णैकतानात्मनः(स्)
सानन्दाः(फ्) परिशोधयन्तु सुधियः(श्) श्रीगीतगोविन्दतः ॥ 3॥

(स्रगधरा)

साध्वी माध्वीकचिन्ता न भवति भवतः शर्करे कर्कशासि
द्राक्षे द्रक्ष्यन्ति के त्वाममृत मृतमसि क्षीरनीरं रसस्ते ।
क्रन्द कान्ताधर धरणितलं गच्छ यच्छान्तिभावं
यावच्छृङ्गारसारस्वतमिह जयदेवस्य विष्वग्वचांसि ॥ 4॥

(त्रिष्टुप)

श्रीभोजदेवप्रभवस्य राधादेवीसुतश्रीजयदेवकस्य ।
पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ॥ 5॥

॥ इति श्रीजयदेवकृतौ गीतगोविन्दे सुप्रीतपीताम्बरो नाम द्वादशः सर्गः ॥

## ॥ इति गीतगोविन्दं समाप्तम् ॥

